# न्यायवैशेषिकयोरभावमीमांसा

**पुरुषोत्तम आचार्यः, विद्यावारिधिकल्पः**
उपप्राध्यापकः, न्यायविभागः नेपालसंस्कृतविश्वविद्यालयः, जनताविद्यापीठम्, दाङः, नेपालः
Email: pyarapuru@gmail.com
https://doi.org/10.3126/haimaprabha.v23i1.66731

**सारसंक्षेपः**

प्रस्तुतोऽयमालेखो न्यायवैशेषिकदर्शनयोरभावमीमांसायां केन्द्रितो वर्तते । गुणात्मकस्वरूपे सज्जीकृतेऽस्मिन् आलेखे पुस्तकालयीयविधिद्वारा प्राप्ततथ्यानां विश्लेषणं विधायान्ते निष्कर्षः प्रस्तुतोऽस्ति । इहालेखे न्याये वैशेषिके च सप्तमपदार्थत्वेनाभिमतस्याभावस्य स्वरूपं विश्लिष्टं वर्तते । अभावस्य स्वरूपम् किम् ? तद्भेदश्च कः ? संसर्गाख्याभावाः के ? इत्यादिशङ्कानिवारणायैवायमालेखः प्रस्तुतः । द्रव्यादिषट्पदार्थभिन्नो यो नास्तीतिप्रतीतिविषयः, सोऽभावो भवति । तच्च नञ्पदजन्यप्रतीतिविषयत्वमेव । अभावभेदप्रतिपादनावसरे तस्य द्वैविध्यं वा चातुर्विध्यं वा षाड्विध्यं वेत्यत्र विदुषां मतैक्यं न दृश्यतेऽपि सारतः प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदेन तच्चातुर्विध्ये न केषाञ्चनाप्यापत्तिः । अभावपदार्थचिन्तनक्रमे कणाद-शङ्करमिश्र-जयन्तभट्ट-विश्वनाथभट्टाचार्य-केशवमिश्र-अन्नम्भट्टप्रभृत्याचार्याणां सिद्धान्तो विवेचितो वर्तते । एवञ्चाध्ययनस्य निष्कर्षरूपेण प्रागभावाप्रतियोगित्वे सति ध्वंसप्रतियोगित्वं प्रागभावत्वम्, प्रागभावप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं प्रध्वंसाभावत्वम्, प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वे सति अन्योन्याभावभिन्नत्वे सति अभावत्वमत्यन्ताभावत्वम्, तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वे सत्यभावत्वमन्योन्याभावत्वमिति निष्कृष्टलक्षणं प्रतिपाद्यान्ते निष्कर्षः प्रदत्तो वर्तते । अस्मान्निष्कर्षान्न्यायवैशेषिकाभिमतस्याभावपदार्थस्यावबोधने जिज्ञासूनां कृतेऽयमालेख उपयोगी भविष्यतीत्यपेक्ष्यते ।

**शब्दकुञ्जी :** अभावः, प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः ।

## विषयपरिचयः

न्याये वैशेषिके च नञ्पदजन्यप्रतीतिविषयत्वेनाभावो निरूपितः । अभावो न पदार्थः, अपितु वाक्यार्थ इत्यप्याचार्याणां भणितिर्दृश्यतेऽपि यथा अस्तीतिप्रतीत्या भावपदार्थस्तथैव नास्तीतिप्रतीत्याऽभावपदार्थोऽपि अङ्गीकार्यः । अत एव भावाभावभेदेन पदार्थस्य द्वैविध्यं प्रतिपादयन्त्याचार्याः । स च द्रव्यादिषट्पदार्थभिन्न एव । नव्यास्तु भावभिन्नत्वमेवाभावत्वमङ्गीकुर्वन्ति । सूत्रकारेण षण्णामेव पदार्थानामुद्देशः कृतोऽप्यभावस्य निषेधस्तु न कुत्रापि कृतः । अभावोऽपि संसर्गाभावान्योन्याभावभेदेन द्वैविध्यं भवति । संसर्गाभावो नाम

स्वप्रतियोगिसम्बन्धविरोध्यभावो ज्ञेयः । संसर्गाभावः पुनः प्रागभावप्रध्वंसाभावात्यन्ताभावभेदात् त्रिविधः । सर्वमाहत्यालेखेऽस्मिन् कणाद-शङ्करमिश्र-अन्नम्भट्टाद्याचार्याणां मतं प्रदर्श्य प्रागभावप्रध्वंसाभावात्यन्ताभाव-अन्योन्याभावभेदेनाभावस्य चातुर्विध्यं विवेचितं वर्तते । कणादेन तु प्रागसत्-सदसत्-असत्-तदसद्भेदेनाभावाख्यः पदार्थो निरूपितः । प्रागभावो हि घटरूपकार्योत्पत्तेः प्राक् घटाद्यवयवकपालयोः प्रतीयमानोऽभावः । स च 'घटो भविष्यती'तिप्रतीतिसिद्धः, भविष्यत्कालीनसत्ताकपटप्रतियोगिताकः 'घटो भविष्यती'ति प्रतीतिसिद्धो वा । इह घटो भविष्यतीति प्रतीत्या प्रागभावसिद्धिः । प्रध्वंसाभावस्तु कार्योत्पत्त्यनन्तरं स्वप्रतियोगिसमवायिकारणे प्रतीयमानोऽभाव इति । यस्याभावस्यादिर्वर्तते, अन्तो नास्ति चेत् स प्रध्वंसाभावो ज्ञेयः । 'घटो नष्टः', 'पटो नष्ट' इति प्रतीत्या प्रध्वंसाभावसिद्धिः । अत्यन्ताभावो नाम त्रैकालिकसंसर्गाभावः । नित्यत्वे सति संसर्गाभावत्वमत्यन्ताभावस्य लक्षणं भवति । 'इह भूतले घटो नास्ति' इति प्रतीतिसिद्धाभावोऽत्यन्ताभावः । अन्योऽन्याभावस्तु परस्परतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावः । 'घटः पटो न', 'पटः घटो न' इति प्रतीत्याऽन्योन्याभावसिद्धिरित्येतादृशविषया एवास्यानुसन्धानात्मकालेखस्य प्रतिपाद्यविषयाः ।

समग्रतया अभावपदवाच्यः कः ? अभावस्वीकारे का युक्तिः ? अभावस्य चातुर्विध्ये किं प्रमाणम् ? तद्भेदश्च कीदृशः ? इत्यादिसमस्यानां समाधानायैव प्रस्तुतोऽयमालेखः । फलतो नञ्पदजन्यप्रतीतिविषयत्वेनाभावस्य स्वरूपविवेचनम्, लौकिकव्यवहारे नास्तीतिप्रतीतेः जायमानत्वाद् भावपदार्थवदभावस्वीकारे प्रमाणप्रदर्शनम्, नञः खलु चतुर्धा प्रयोगात्तथैव व्यवहारदर्शनाद्वा तच्चातुर्विध्यप्रतिपादनमेवास्यालेखस्योद्देश्यमस्ति । मूलतोऽस्यालेखस्य न्यायदर्शनं वैशेषिकदर्शनञ्च मुख्यं क्षेत्रं वर्तेते चेत् प्रागभावादिचतुर्णामभावानां विश्लेषणं सीमान्तर्भूतमस्ति । सम्प्रति न्यायवैशेषिकदर्शनाभिमतस्याभावाख्यपदार्थस्य स्वरूपं तद्भेदविश्लेषणञ्च क्रमशः प्रस्तूयेते ।

## अध्ययनविधिः

प्रस्तुतोऽयमालेखः पुस्तकालयीयविधिमवलम्ब्य सज्जीकृतो विद्यते । अस्यालेखस्योपादेयतामापादयितुं न्यायवैशेषिकदर्शनसम्बद्धसंस्कृतमूलाकरग्रन्थाः प्रथमसामग्रीत्वेन प्रयुक्ताः । भाषान्तरेष्वनूदितग्रन्थाश्च द्वितीयकसामग्रीत्वेन प्रयुक्ता विद्यन्ते । अत्रालेखे न्यायवैशेषिकदर्शनसम्बद्धेभ्यः सूत्रभाष्यादिग्रन्थेभ्यः, अभावपदार्थनिरूपकग्रन्थान्तरेभ्यश्च सामग्र्यस्सङ्कलिता विद्यन्ते । अभावविषयकचिन्तनक्रमे ताभ्यस्सङ्कलिताभ्यः सामग्रीभ्यः प्राप्ततथ्यानां विश्लेषणं विधाय निष्कर्षः प्रस्तुतो विद्यते ।

## सैद्धान्तिकाधारः

आलेखेऽस्मिन् न्यायवैशेषिकाभिमतोऽभावपदार्थो विश्लिष्टो वर्तते । न्यायवैशेषिकदर्शनसम्बद्धाः सूत्रभाष्यादिग्रन्थाः, एतद्विषयसम्बद्धा व्याख्यानात्मका ग्रन्थाश्चात्र सैद्धान्तिकाधारत्वेनाङ्गीकृताः । विशेषतोऽस्मिन् अनुसन्धानात्मकालेखे वैशेषिकसूत्रम्, वैशेषिकसूत्रोपस्कारः, न्यायमञ्जरी, कारिकावली,

न्यायसिद्धान्तमुक्तावली, तर्कभाषा, तर्कसङ्ग्रहश्चेत्यादिग्रन्थाः सैद्धान्तिकाधारत्वेन परिगणिता विद्यन्ते । एतादृशसैद्धान्तिकाधारे अभावपदार्थस्वरूपम्, प्रागभावादिभेदेन तद्विभागञ्च विविच्यालेखोऽयं सज्जीकृतः । एवमेव प्रविध्यादिविषयं व्यवस्थातुमत्रालेखे प्रचलिता लेखकमिति(एपीए)पद्धतिरनुसृता वर्तते ।

## विश्लेषणप्रक्रिया

'न्यायवैशेषिकयोरभावमीमांसा' इति शीर्षके केन्द्रीभूयायमनुसन्धानात्मकालेखः सज्जीकृतः । अस्यानुसन्धानात्मकालेखस्य पूर्णतायै प्रथमन्तावद् न्यायवैशेषिकसम्बद्धा ग्रन्था निर्धारिताः । तत्राभावपदार्थविश्लेषणे कणादप्रभृत्याचार्योक्ताभावस्वरूपं तल्लक्षणञ्च प्रदर्श्य प्रागभावादिभेदेन तच्चातुर्विध्यं प्रस्तुतम् । एवमेव तेषु चतुर्विधाभावेषु सर्वप्रथमं प्रागभावम्, तदनन्तरं प्रध्वंसाभावम्, अत्यन्ताभावम्, अन्योन्याभावञ्च विश्लिष्यान्ते निष्कर्षः प्रदत्तो विद्यते ।

### अभावः

भावाभावभेदेन पदार्थो द्विविधः । तत्र 'अस्ति' इतिप्रतीतिविषयो भावपदार्थः । स च द्रव्यगुणकर्मसामान्यविशेषसमवायभेदेन षड्विधः । अभावस्तु पुनः द्रव्यादिषट्पदार्थेभ्यो भिन्नः कश्चन पदार्थः । स च 'नास्ति', 'न' इत्येतादृशप्रतीतिविषयात्मकः । भावो नाम सत्ता, न भावः अभावः । अनेन भावभिन्नत्वमभावत्वमिति अभावसामान्यलक्षणं ज्ञातं भवति । अभावो हि नास्तीतिप्रतीतिविषयः, 'नञ्'पदजन्यप्रतीतिविषयः, प्रतियोगिज्ञानसापेक्षज्ञानविषयो वा । एतेन नञ्पदजन्यप्रतीतिविषयत्वम्, प्रतियोगिज्ञानसापेक्षज्ञानविषयत्वं वाऽभावस्य विशेषलक्षणमिति स्पष्टायते । लोकव्यवहारे 'अस्ति' इतिप्रतीतिविषयो यथा, तद्वत् 'नास्ति' इतिप्रतीतिविषयोऽप्यावश्यकः । स एवाभावः । मुक्तावलीकारस्तु 'अभावत्वं द्रव्यादिषट्काऽन्योन्याभाववत्त्वम्' (भट्टः, सन् २००३, २५) इत्याह । द्रव्यं न, गुणो न, कर्म न, सामान्यं न, विशेषो न, समवायो नेति प्रतीतिसिद्धान्योन्याभाववत्त्वम्, अपि च द्रव्यत्वगुणत्वाद्यवच्छिन्नप्रतियोगिताकभेदषट्कत्वमभावत्वमिति वा भट्टाशयः । द्रव्ये गुणादिपञ्चकभिन्नत्वं विद्यते । एवमेव गुणादिष्वपि ज्ञेयम् । नव्यास्तु भावभिन्नत्वमेवाभावत्वमिति स्वीकुर्वन्ति । कुतः ? उच्यते - तथाहि भावभिन्नत्वस्याभावत्वे भावत्वरूपविशेषणशून्यकाले पटो नास्तीति प्रतीत्यनापत्तिस्स्यात् । एवञ्च भेदस्य खलु अभावत्वघटितत्वे, अभावत्वस्य च भेदघटितत्वेऽन्योन्याश्रयापत्तिरर्थात् 'अभावो न भावः' इत्येतस्माद् वाक्यात् शाब्दबोधानुपपत्तिरिति भावः । तस्मान्नव्याः प्रमाणाभावेनाभावत्वस्याखण्डोपाधित्वं नाङ्कुर्वन्ति । एतेन भावभिन्नत्वमभावत्वमिति लक्षणं नव्यदृष्ट्या प्रतिष्ठापितं भवति ।

अत्रेदं ज्ञेयम्- नञ्पदजन्यप्रतीतिविषयत्वमभावत्वमित्युक्ते प्रागभावे प्रध्वंसाभावे चाव्याप्तिस्स्यात् । यतो हि 'पटोऽत्र भविष्यति' इतिप्रतीतिसिद्धप्रागभावस्य 'इह घटो नष्टः' इतिप्रतीतिसिद्धप्रध्वंसाभावस्य च नञ्पदजन्यप्रतीतिविषयत्वाभावादव्याप्तिः दुर्वारा । तादृशावस्थायां प्रतियोगिज्ञानसापेक्षज्ञानविषयत्वमिति वक्तव्यम् । एवञ्च 'पटोऽत्र भविष्यति' 'इह घटो नष्टः' इतिप्रतीतिसिद्धयोः प्रागभावप्रध्वंसाभावयोः

प्रतियोगिज्ञानसापेक्षज्ञानविषयत्वसत्त्वान्नाव्याप्तिरिति । वस्तुतोऽत्यन्ताभावे, अन्योऽन्याभाव एव नञः नियतः प्रयोगो दरीदृश्यते । यस्याभावः स प्रतियोगी । यथा 'भूतले घटाभावः' इत्यत्र घटाभावस्य प्रतियोगी घटः । तज्ज्ञानाधीनज्ञानविषयत्वं प्रागभावे, प्रध्वंसाभावे, अत्यन्ताभावे, अन्योऽन्याभावे च चतुर्षु वर्तत इति लक्षणसमन्वयः ।

न्यायवैशेषिका हि प्रतीतिव्यवहारानुरोधेनाभावाख्यं कञ्चन पदार्थमङ्गीकृतवन्तः । यद्यपि कणादेन ''धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्'' (वैशेषिकसूत्रम्, १।१।४) इत्यस्मिन् सूत्रे स्वकण्ठरवेण षण्णामेव पदार्थानामुद्देशो विहितः, अभावस्तु नोक्तस्तथापि गच्छता कालेनानन्तरकालिकैः वैशेषिकाचार्यैरभावमपि सङ्गृह्य सप्त पदार्थाः प्रतिष्ठापिताः । सूत्रकारेण कणादेन प्रथमाध्यायस्य प्रथमाह्निकस्य चतुर्थसूत्रेऽभावपदार्थस्यानभिधानादभावो न स्वीकृत इति नावधेयमस्माभिः । कुतः ? तेनैव सूत्रकारेण नवमाध्यायप्रथमाह्निकस्य प्रथमसूत्रतः पञ्चमसूत्रं यावदभावो निरूपितः खलु । प्रागसत्-सदसत्-असत्-तदसद्भेदेन अभावो विभज्यते कणादेन तत्र । तेषां पञ्चानां सूत्राणां विश्लेषणमग्रेऽभावभेदोपक्रमे प्रस्तोष्यते । एवञ्च "असतः क्रियागुणव्यपदेशाभावादर्थान्तरम्" (वैशेषिकसूत्रम्, ९।१।३) इत्यस्मिन् सूत्रे असतो वस्तुनः (अविद्यमानाद् वस्तुनः) क्रियागुणयोर्व्यवहाराभावेन भावपदार्थभिन्नोऽभावोऽङ्गीकार्य इति स्वयमेवोक्तत्वादभावमनङ्गीकृत्यैव प्रवर्तितः कणाद इति को वा वदेत् ? न कोऽपीति । किञ्च सूत्रे षण्णां भावपदार्थानां निरूपणन्तु तत्त्वज्ञानोपयोगित्वेनैव । अभावस्तु पदार्थस्सन्नपि न तत्त्वज्ञानोपयोगी । अत एव पदार्थोद्देशप्रकरणे कणादेनाभावो न परिगणित इति बोध्यम् (सिंहः, ?, ९) । न्यायदर्शने तु गौतमः षोडशपदार्थान् आह । एवं सत्यपि सप्तपदार्थवादीनां वैशेषिकानां षोडशपदार्थवादीनां नैयायिकानाञ्च परस्परं विरोधो नास्ति । कुतः ? तयोः न्यायवैशेषिकयोस्समानतन्त्रत्वादिति तु ध्येयो विषयः । मुक्तावलीकारोऽपि तथैव निगदति यत्- 'एते च पदार्था वैशेषिकनये प्रसिद्धाः, नैयायिकानामप्यविरुद्धाः' (भट्टः, सन् २००३, २५) इत्यनेन न्यायवैशेषिकसूत्रकारयोः कणादगौतमयोः पदार्थोद्देशप्रकरणे चिन्तनवैभिन्यं दृश्यतेऽपि न तद् दोषावहम् । तथा च वैशेषिकोक्ताभावस्य न्यायदर्शनेऽप्यङ्गीकृतत्वात्तयोः सङ्गतिस्सुतरामेवोपतिष्ठत इति स्पष्टीभवति ।

**अभावभेदः**

वैशेषिकसूत्रेऽभावस्य पृथक्पदार्थत्वेन प्रतिपादनन्न दृश्यते, अथापि तस्याभावस्यास्तित्वन्तु स्वीक्रियत एव । जरन्नैयायिको जयन्तस्तु न्यायमञ्जर्यां प्रागभावप्रध्वंसाभावभेदेनाभावस्य द्वैविध्यन्निरूपितवान् । अत्यन्ताभावम्, अन्योन्याभावञ्चादाय तस्य चातुर्विध्यमित्यन्ये न्यायवैशेषिकाः । अपेक्षाभावं सामर्थ्याभावञ्चादाय तस्य षड्विधत्वमित्यन्य इति जयन्तभणितिः । यथोक्तम्- "स च द्विविधः प्रागभावः, प्रध्वंसाभावश्चेति । चतुर्विध इत्यन्ये । इतरेतराभावः, अत्यन्ताभावश्च तौ च द्वाविति । षट्प्रकार इत्यन्ये । अपेक्षाभावः, सामर्थ्याभावः, ते च चत्वार इति" (भट्टः, सन् २०१७, ९९) । विश्वनाथस्त्वभावस्य

संसर्गान्योन्याभावभेदाद् द्वैविध्यमित्यवोचत् । तन्मते संसर्गाभावो हि प्रागभावप्रध्वंसाभावान्यन्ताभावभेदेन त्रिविध इति।

वस्तुतो नञश्चतुर्धा प्रयोगादर्थादभावप्रतीतेः व्यवहारस्य वा चतुर्धावलोकनात् तदर्थभूतस्याभावस्यापि चातुर्विध्यमिति तु गाढं चिन्तनीयम् । संसर्गाभावो नाम संसर्गविरोधी सम्बन्धविरोधी वा । स्वप्रतियोगिसम्बन्धस्य विरोधी योऽभावः, सः संसर्गाभाव इति ज्ञेयम् । संसर्गाभावो यत्र भवति, तत्र तत्प्रतियोगी न स्थातुं शक्नोति। यथा- कपाले घटप्रागभावो विद्यते किल। तत्र कपाले यः घटप्रागभावः, सः संसर्गाभाव एव । कुतः ? स्वप्रतियोगिसंसर्गस्य विरोधित्वादिति । एवं कपालसंयोगनाशे घटध्वंसाधिकरणे कपाले घटस्य संसर्गो नास्तीति ध्वंसाभावस्यापि स्वाधिकरणे प्रतियोगिसंसर्गविरोधित्वं ज्ञेयम् । एवमेवात्यन्ताभावस्यापि स्वप्रतियोगिसंसर्गविरोधित्वमिति । न्यायवैशेषिकशास्त्रेऽभावस्य वस्तुसत्तामात्रं नाङ्गीक्रियतेऽपितु भेदोपभेदवर्णनमपि प्राप्यते। तदुक्तञ्च कारिकावल्याम्-

अभावस्तु द्विधा संसर्गान्योऽन्याभावभेदतः।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च॥ (भट्टाचार्यः, सन् २००३, कारिका-१२)

संसर्गाभावान्योऽन्याभावभेदेनाभावस्य द्वैविध्यम् । आद्यस्संसर्गाभावः पुनः प्रागभावप्रध्वंसाभाव-अत्यन्ताभावभेदेन त्रैविध्यं भवति । समग्रतयाऽभावः प्रागभावप्रध्वंसाभावात्यन्ताभावान्योऽन्याभावभेदेन चतुर्विध इति कारिकार्थः । संसर्गाभावस्य लक्षणं करोति विश्वनाथो यत्- “संसर्गाभावत्वमन्योऽन्याभावभिन्नाभावत्वम्” (भट्टाचार्यः, सन् २००३, ६०) इति । तथा चान्योऽन्याभावभिन्नत्वे सति अभावत्वं संसर्गाभावस्य निष्कृष्टलक्षणं भवति। अभावत्वं संसर्गाभावत्वमित्येव लक्षणं क्रियते चेत् अन्योऽन्याभावेऽतिव्याप्तिः। तद्वारणाय प्रथमपदम्। तावन्मात्रोक्तौ घटपटादावतिव्याप्तिः। अतस्तद्वारणाय द्वितीयपदम्। सम्प्रत्येषां चतुर्णामभावानां विवेचनं क्रमशः प्रस्तूयते।

**प्रागभावः**

प्रागभावो नाम ‘घटो भविष्यती’तिप्रतीतिसिद्धोऽभावः। नञो विषयीभूताभावो वा। कार्योत्पत्तेः पूर्वं स्वप्रतियोगिसमवायिकारणे प्रतीयमानोऽभावः प्रागभावो भवतीत्यर्थः । प्रागभावः खलु प्रतियोगिन उत्पत्तेः प्राक् तत्समवायिकारणे विद्यतेऽतस्स समवायिकारणवृत्तिरिति वाऽर्थः । इदानीं कश्चन घट उत्पद्यते चेदितः पूर्वन्तु घटो नासीदनन्तरं भविष्यतीति व्यवहारे घटस्योत्पत्तेः प्राक् घटो नास्तीत्येव वदन्ति किल जनाः । तत्र कार्यस्य=घटस्य, उत्पत्तेः पूर्वं तस्य कार्यस्याभावो विद्यते, तादृशाभावः प्रागभाव इति तात्पर्यम्। इह कपालयोः घटो भविष्यतीति प्रागभावस्याकारो ज्ञेयः । पदार्थोद्देशप्रकरणे महर्षिकणादोऽभावं विहाय द्रव्यादिषट्पदार्थान् एव प्रतिपादयत्यपि नवमाध्यायस्य प्रथमाह्निके “क्रियागुणव्यपदेशाभावात् प्रागसत्” (वैशेषिकसूत्रम्, ९।१।१) इत्यत्र प्रथमसूत्रेऽभावपदार्थविवेचनेनायमपि अभावं सर्वथा तिरस्कर्तुं नाशक्नोदिति ज्ञायते। क्रियायाः गुणस्य च व्यपदेशाभावात्=व्यवहाराभावादेव प्राक्=कार्यस्योत्पत्तेः पूर्वम्, असत्=कार्यं नासीत् (कार्याभाव आसीत्) इति सूत्रार्थः। क्रियागुणयोः व्यवहाराभावेनोत्पत्तिपूर्वं वस्तु असदेव भवति। अयमेव प्रागभाव इति सूत्राशयः।

वैशेषिकसूत्रोपस्कारे तु "यदि तदानीमपि कार्यं घटादि सदेव स्यात्तदा क्रियावत्त्वेन गुणवत्त्वेन च व्यपदिश्येत, यथोत्पन्ने घटे घटस्तिष्ठति घटश्चलति रूपवानयं दृश्यते घट इत्यादिप्रकारेण व्यपदिश्यते न तथोत्पत्तेः प्रागपि व्यपदेशोऽस्ति । तेन गम्यते तदानीमसन्निति" (मिश्रः, सन् २०१९, ४६७) इत्युक्तं ग्रन्थकारेण । अयं भावः - यद्युत्पत्तेः प्रागपि घटादिकार्यं साङ्ख्यवत् सदेव स्यात्तर्हि कार्योत्पत्तिपूर्वं कारणे घटादौ क्रियाश्रयत्वेन गुणाश्रयत्वेन च व्यवहारापत्तिस्स्यात् । यथोत्पन्ने घटरूपकार्ये घटोऽस्ति, घटश्चलति, घटोऽयं रूपवान्, घटो दृश्यत इत्यादिव्यवहारः सर्वानुभवसिद्धः, तथैव व्यवहारः कार्योत्पत्तिपूर्वक्षणे न भवतीत्यत उत्पत्तेः प्राक् घटादिकार्यं द्रव्यं वाऽसदेवेति सिद्ध्यति ।

किञ्च कारणे कपालादौ घटस्य सत्त्वं स्वीक्रियेत, तदा कार्योत्पत्तिपूर्वमेव कारणे कपालादौ श्यामो घटः, रक्तो घटः, अयं घटः, अत्र घट इत्यादिव्यवहारस्स्यात्, न च तथा व्यवहारः क्रियतेऽतः कार्यं न सत्, अपि त्वसदेव (अर्यालः, २०७८, २५२) । योऽनादिस्सन् सान्तः, स प्रागभावोऽर्थाद् यस्यादिर्नास्ति किन्त्वन्तो विद्यते, स प्रागभावः । यथोक्तम्- "अनादिस्सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य" (भट्टः, सन् २००४, ७८) । इदानीमत्र घटाभावो विद्यते । स चाभावोऽनादिकालादेव । अतोऽनादिः । यदा घट उत्पद्यते, तदा घटाभावो नश्यति, अतस्सान्तः । एवञ्च घटस्योत्पत्तिपूर्वमिह कपालयोः घटो भविष्यतीति प्रतीतिसिद्धाभावस्यानादित्वे सति सान्तत्वात्तस्य प्रागभावत्वमिति लक्षणसमन्वयः । अनादित्वे सति सान्तत्वं हि तल्लक्षणम् । सान्तत्वं प्रागभावत्वमित्येव लक्षणमुच्यते चेद् घटादावतिव्याप्तिः । कुतः ? घटादीनां सान्तत्वात् । अतस्तद्वारणायानादित्वमिति पदं देयम् । अनादित्वं प्रागभावत्वमित्येव लक्षणमुच्यते चेदाकाशपरमाण्वादिष्वतिव्याप्तिः । तेषामाकाशादीनां खल्वनादित्वात् । अतस्तद्वारणाय सान्तत्वमित्यपि पदं देयम् । एवञ्चाकाशादीनां सान्तत्वाभावात्तत्र नातिव्याप्तिः । न्यायमञ्जरीकारस्त्वेमाह -

प्रागात्मलाभान्नास्तित्वं प्रागभावोऽभिधीयते ।
उत्पन्नस्यात्महानन्तु प्रध्वंस इति कथ्यते ॥ (भट्टः, सन् २०१७, ९९)

आत्मलाभात्=स्वोत्पत्तेरर्थात् घटरूपकार्यस्योत्पत्तेः, प्राक्=पूर्वम्, नास्तित्वम्=इह कपाले घटो नास्तीति यः प्रतीतिसिद्धाभावस्स प्रागभावोऽभिधीयते=उच्यत इति कारिकार्थः । तर्कभाषाकारस्य आशयोऽप्येतादृश एव । तद्यथा "उत्पत्तेः प्राक् कारणे कार्यस्याभावः प्रागभावो यथा तन्तुषु पटाभावस्स चानादिरुत्पत्तेरभावात् । विनाशी च कार्यस्यैव तद्विनाशरूपत्वात्" (मिश्रः, सन् २००३, ४१५) । मुक्तावलीकारस्तु "विनाश्यभावत्वं प्रागभावत्वम्" (भट्टाचार्यः, सन् २००३, ६१) इति वदति । विनाशित्वे सति अभावत्वं प्रागभावस्य लक्षणमित्याशयः । यथा तन्तुषु पटाभावः । अत्र प्रतियोगिनः पटस्य समवायिकारणे तन्त्वादौ प्रागभावोऽयं विद्यते । स च प्रागभावो भविष्यत्कालीनसत्ताकघटप्रतियोगिताकः 'पटो भविष्यती'ति प्रतीतिसिद्धः ।

वस्तुतः प्रागभावाप्रतियोगित्वे सति ध्वंसप्रतियोगित्वं प्रागभावस्य लक्षणं ज्ञेयम् । प्रागभावस्य खलु उत्पत्त्यभावात् कार्योत्पत्तिक्षणे तस्य नाशाच्च तत्र लक्षणसमन्वयः । घटोत्पत्तिपूर्वमिह कपालयोर्घटो

भविष्यतीति प्रतीत्या प्रागभावस्सिद्ध्यति । उत्पद्यमानस्य यस्य कस्यापि कार्यस्य कारणं हि निश्चितमेव । कारणं विना न कार्यस्योत्पत्तिः । सर्वस्यापि कार्यस्य निश्चितमेव कारणं भवति । यथा तन्तुभ्यः पटोत्पत्तिरेव, कपालाद् घटोत्पत्तिरेव । तन्तुभ्यो न घट उत्पद्यते, न वा कपालात् पट उत्पद्यते । कुतः ? अस्ति खलु तत्र कार्यकारणभावरहस्यम् । यत्किमपि यदि सत्तर्हि कारणावस्थायामपि कार्यव्यवहारापत्तिस्स्यात् । न च तथा भवतीत्यत उत्पत्तेः प्राक् वस्तु असदेव सिद्ध्यति । यथा पटः स्वसमवायिकारणे तन्तौ सद्रूपेण स्यात्तर्हि पटात्मककार्योत्पत्तिपूर्वमेव 'रक्तः पटः', 'श्यामः पटः', 'अत्र पटो वर्तते' इत्याकारकव्यवहारः क्रियेत, न च तादृशव्यवहारः क्रियत इति कार्यं न सत् । अनेनोत्पत्तिपूर्वं कार्यमसदेव भवतीति स्पष्टं भवति । इयं खलु कार्याभावावस्थैव प्रागभावोऽस्तीति गाढं चिन्तनीयम् ।

**प्रध्वंसाभावः**

प्रध्वंसाभावो नाम कस्यापि कार्यस्योत्पत्त्यनन्तरं समवायिकारणे तस्य योऽभावोऽनुभूयते, स प्रध्वंसाभावः । प्रागभावप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं प्रध्वंसाभावत्वम् । घटादिकार्यस्योत्पत्त्यनन्तरं स्वप्रतियोगिसमवायिकारणवृत्तिर्योऽभावः स प्रध्वंसाभावो वा । घटस्य पटस्य च नाशानन्तरं 'घटो नास्ति', 'पटो नास्ति' इति प्रतीतेर्विद्यमानत्वात् प्रध्वंसाभावस्सिद्ध्यति । महर्षिकणादस्तु "सदसत्" (वैशेषिकसूत्रम्, ९।१।२) इत्यनेन सूत्रेण प्रध्वंसाभावं निरूपयति । सत्=सद्रूपं कार्यम्, असत्=अविद्यमानं भवति, नास्तीत्यर्थः । तथा च सतः कार्यस्य वस्तुनो वा अभावेनैव वस्तु असद् भवतीति सूत्रार्थः । कार्यध्वंसानन्तरं कार्यमसत्=कार्याभावव्यवहारजनको योऽभावस्स प्रध्वंसाभावो भवतीति तात्पर्यम् । वैशेषिकसूत्रोपस्कारेण तु "विनाशकस्य मुद्गरादेर्व्यापारानन्तरं सदेव कार्यं घटादि, इदानीमसदिति प्रत्यक्षानुमानाभ्यामेव प्रमीयते" (मिश्रः, सन् २०१९, ४६९) इति रीत्या प्रध्वंसाभावो निरूप्यते । तद्यथा कपालसंयोगाद् घटोत्पत्तिः, घटोत्पत्त्यनन्तरं मुद्गराभिघातादिकारणेन घटसमवायिकारणे कपाले घटाभावो जायते, तत्र घटादिकार्यमिदानीमसत्=अवर्तमानमस्तीति प्रत्यक्षानुमानाभ्यां निश्चीयते । तादृशाभाव एव प्रध्वंसाभावः । एवञ्च प्रध्वंसाभावोऽपि प्रागभाववत् समवायिकारणवृत्तिः । 'पटो ध्वस्तः', 'घटो ध्वस्तः' इति प्रतीतिसिद्धाभाव एव प्रध्वंसाभावः । नञो विषयीभूतोऽभावः प्रध्वंसाभाव इत्यपि बोध्यम् ।

यस्याभावस्यादिरस्ति, अन्तो नास्ति चेत्तादृशोऽभावः प्रध्वंसाभावः । यथोक्तम्- "सादिरनन्तः प्रध्वंसः, उत्पत्त्यनन्तरं कार्यस्य" (भट्टः, सन् २००४, ७८) इति । यस्य कस्यापि घटादिकार्यस्योत्पत्त्यनन्तरं तत्समवायिकारणे कपालादौ घटादिकार्यस्य योऽभावः, स प्रध्वंसाभावः । तथाहि- कश्चन जनः दण्डाद्यभिघातेन घटं नाशयति । ततस्तत्र कपालमेवावशिष्टम् । तत्रेह कपाले घटो नास्ति, ध्वस्तो वा इत्याकारकप्रतीतिविषयो यः, स प्रध्वंसाभाव इत्यर्थः । सादित्वे सत्यनन्तत्वं प्रध्वंसाभावस्य लक्षणमिति बोध्यम् । सादित्वं प्रध्वंसाभावत्वमित्येव लक्षणं क्रियते चेद् घटादावतिव्याप्तिः । कुतः ? घटादीनां खलु सादित्वात् । अतस्तद्वारणाय लक्षणे अनन्तत्वपदं देयम् । घटादीनां खलु सादित्वेऽप्यनन्तत्वाभावात्तत्र नातिव्याप्तिः ।

अनन्तत्वं प्रध्वंसाभावत्वमित्येवोच्यते चेदाकाशादावतिव्याप्तिः । अतस्तद्वारणाय सादित्वपदमपि देयम् । आकाशादीनामनन्तत्वेऽपि सादित्वाभावात्तत्र नातिव्याप्तिः ।

वस्तुतो घटावयवयोर्विच्छिन्नकपालयोरेव घटस्य ध्वंसाभावोऽनुभूयते, न तु तत्पूर्वमिति ध्वंसाभावस्य सादित्वमङ्गीकार्यम् । मुद्गरादिकारणेनैव घटध्वंस उत्पद्यतेऽतस्तस्य जन्यत्वं सादित्वञ्च सुतरां सिद्ध्यति । उक्तञ्च "जन्याभावत्वं ध्वंसत्वम्" (भट्टाचार्यः, सन् २००३, ६१) इति । जन्यत्वे सत्यभावत्वं हि प्रध्वंसाभावस्य लक्षणं भवति । अभावत्वं प्रध्वंसाभावत्वमित्येतावन्मात्रोक्तौ प्रागभावादावतिव्याप्तिः । अतस्तद्वारणाय जन्यत्वपदम् । प्रागभावादीनामभावत्वेऽपि जन्यत्वं नास्तीति तत्र नातिव्याप्तिः । यदि च जन्यत्वं प्रध्वंसाभावत्वमित्येव लक्षणं तदा घटपटादावतिव्याप्तिः । अतस्तद्वारणायाभावत्वमपि पदं लक्षणे निवेशनीयम् । एवञ्च घटपटादीनां जन्यत्वेऽपि अभावत्वाभावात्तत्र नातिव्याप्तिः । तर्कभाषाकारस्तु "उत्पन्नस्य कारणेऽभावः प्रध्वंसाभावः । प्रध्वंसो विनाश इति  यावत् । यथा भग्ने घटे कपालमालायां घटाभावः । स च मुद्गरप्रहारजन्यः । स चोत्पत्तिमानप्यविनाशी । नष्टस्य कार्यस्य पुनरनुत्पत्तेः" (मिश्रः, सन् २००३, ४१५) इति भणति । घटध्वंसस्य नाशासम्भवात्तस्य खल्वनन्तत्वमविनाशित्वञ्चेति ।

अत्र प्रश्नः - 'य उत्पत्तिमान् स नाशवान्' इति व्याप्त्या यथा घटपटादीनां जन्यत्वान्नाशवत्त्वं तद्वत् प्रध्वंसाभावस्यापि जन्यत्वान्नाशवत्त्वं कुतो न ? इति प्रश्ने नष्टस्य कार्यस्य पुनरुत्पत्तिर्न भवति । ध्वंसो नाम प्रतियोगिविरोधी किल । ध्वस्तं वस्तु न पुनरुत्पद्यत इति ध्वंसाभावस्य ध्वंसो नाङ्गीक्रियते । मुद्गरप्रहारादिना घटे नष्टे तत्र कपालमेवावशिष्टं भवति । तेन कपालेन पुनरुत्पद्यमानो घटो हि न प्राक्तनः, अपि तु भिन्न एव । पूर्वं नष्टस्य घटस्य पुनरुत्पत्तिर्न सम्भवतीति बोध्यम् ।

वस्तुतो घटपटादिध्वंसाभावस्य प्रतियोगिभूतेन घटपटादिनैव विरोध इति घटपटादिध्वंसाभावस्य ध्वंसः प्रतियोगिना घटपटादिनैव साधनीयः । तादृशनष्टस्य घटपटादेः खलु पुनरुत्पत्तिर्न सम्भवतीति घटाभावाद् घटध्वंसाभावस्य पटाभावाद्वा पटध्वंसाभावस्य ध्वंसोऽपि न सम्भवति । अत एव ध्वंसाभावस्याविनाशित्वमङ्गीकार्यम् ।

**अत्यन्ताभावः**

अत्यन्ताभावो नाम भूतभविष्यद्वर्तमानात्मककालत्रये संसर्गेण वर्तमानो योऽभावः, सोऽत्यन्ताभावः । स च प्रतियोगिसमवायिकारणव्यतिरिक्तस्थल एव । नित्यसंसर्गाभावत्वमत्यन्ताभास्य सामान्यलक्षणं भवति । यस्य संसर्गाभावस्योत्पत्तिर्नास्ति, विनाशोऽपि नास्ति, सोऽत्यन्ताभाव इति वा । यस्याभावस्याभावो न कदापि सम्भवति, सोऽत्यन्ताभाव इति तात्पर्यम् । महर्षिकणादस्तु "यच्चान्यदसदतस्तदसत्" (वैशेषिकसूत्रम्, ९।१।५) इत्यनेन सूत्रेणात्यन्ताभावं निरूपयति । यच्चासत्=योऽभावः, अतः=पूर्वोक्तेभ्यः प्रागभावप्रध्वंसाभावान्योऽन्याभावेभ्यः, अन्यत्=भिन्नोऽस्ति, तत्=तादृशाभावः, असत्=अत्यन्ताभावो भवतीति सूत्रार्थः । प्रागभावप्रध्वंसाभावान्योऽन्याभावानां प्रतियोगी प्राप्यते, किन्त्वत्यन्ताभावस्य प्रतियोगी न प्राप्यते । यथा 'इह भूतले घटो नास्ति' इतिप्रतीतिसिद्धाभावोऽत्यन्ताभावः । कुत्रापि भूतले घटो नास्तीति न,

इह भूतले घटसंसर्गो नास्तीत्येव तात्पर्यम् । एवमेव 'शशश्रृङ्गं नास्ति', 'गगने पुष्पं नास्ती'त्यादिप्रतीतिसिद्धाभावोऽपि स एव । अत्रापि शशे श्रृङ्गसम्बन्धः, गगने पुष्पसम्बन्धो नास्तीत्येव तात्पर्यं बोध्यम् ।

अत्र प्रश्नः - 'इह गेहे घटो नास्ति' इत्याकारकव्यवहारः खल्वस्माभिः क्रियते । अयञ्चाभावो नात्यत्यन्ताभावः, यतो हीदानीं घटो नास्त्यपि कस्मिँश्चित्समये कालान्तरे वात्र घटमानेतुं शक्यते किल । तथा चात्र कथमत्यन्ताभावो व्यवहर्तुं शक्यते ? एतादृशाभावस्य कुत्रचिद् गृहादिस्थानेषु विद्यमानत्वात् प्रागभावत्वं प्रध्वंसाभावत्वञ्चापि न स्वीकर्तुं शक्यते । कुतः ? प्रागभावप्रध्वंसाभावयोः खलु समवायिकारणवृत्तित्वात् । अत एतादृशाभावः किन्नामधेयः ? इति प्रश्ने सूत्रकारस्समाधत्ते "नास्ति घटो गेहे इति सतो घटस्य गेहसंसर्गप्रतिषेधः" (वैशेषिकसूत्रम्, ९।१।१०) । सूत्रस्यास्याशयं प्रतिपादयति वैशेषिकसूत्रोपस्कारे ग्रन्थकारो यत् "गेहे घटस्य यः संसर्गः संयोगस्तस्य प्रतिषेधः, स च यदि कदाचिदपि न घटस्तदात्यन्ताभाव एव, भविष्यतः प्रागभावो भूतस्य प्रध्वंसाभावः" (मिश्रः, सन् २०१९, ४६९) इति । इह गेहे घटो नास्तीत्यत्र घटस्य गृहे संयोगरूपसम्बन्धस्य निषेध एव । कुत्रचिद् गेहे घटोऽस्ति, किन्तु अत्र गेहे नास्ति, अर्थात् गृहसंसर्गाभावोऽस्तीत्येव तात्पर्यम् । यदि गेहे कदापि घटसंसर्गो न भवति चेत्तादृशसंसर्गाभावो नित्यः, अर्थात् अत्यन्ताभावो भवति । कैश्चिदाचार्यैरयमभावः सामयिकाभाव इत्युच्यते ।

तर्कसङ्ग्रहकारेण त्रैकालिको यस्संसर्गाभावः, सोऽत्यन्ताभाव इत्युच्यते । यथा भूतले घटो नास्ति । अत्र भूतले घटस्य निषेधो नाम घटसम्बन्धनिषेध एव ज्ञेयः । घटनिषेध इति न मन्तव्यम्, कुतः ? अन्यत्र कुत्रचित् घटस्य विद्यमानत्वादिति । तद्यथा "त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः" (भट्टः, सन् २००४, १८१) । ध्वंसे प्रागभावे चातिव्याप्तिवारणाय त्रैकालिकत्वमिति पदम् । अन्योन्याभाववारणाय संसर्गपदमपि निवेशनीयं लक्षणे । मुक्तावलीकारस्तु "नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम्" (भट्टाचार्यः, सन् २००३, ६२) इति वदति । नित्यत्वे सति संसर्गाभावत्वमत्यन्ताभावस्य लक्षणं भवति । त्रैकालिकत्वं हि नित्यत्वम् । तद्धि प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वरूपम् । संसर्गाभावत्वञ्च अयोन्याभावभिन्नाभावत्वं बोध्यम् । एवञ्च प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वे सत्यन्योन्याभावभिन्नत्वे सत्यभावत्वमत्यन्ताभावस्य लक्षणमिति सिद्धम् ।

वस्तुतो यः संसर्गाभावो न वोत्पद्यते, न वा विनश्यति, सोऽत्यन्ताभावो भवति । प्रतियोगिसमवायिव्यतिरिक्तस्थले 'इह घटो नास्ती'ति निषेध एव त्रैकालिकोऽत्यन्ताभावो भवति । वायौ रूपाभावस्य त्रैकालिकत्वान्नित्यस्संसर्गाभावश्चायमत्यन्ताभावः ।

**अन्योन्याभावः**

अन्योन्याभावो नाम परस्परतादात्म्यनिषेधः । तन्नाम परस्परतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभाव इति । 'घटः पटो न', 'पटः घटो न' इति प्रतीतिसिद्धाभावोऽन्योन्याभावः । घटो यदि घटात्मकत्वान्न पटात्मकः, तर्हि पटोऽपि पटात्मकत्वान्न घटात्मक

इति तयोः परस्परं तादात्म्येन व्यवहारविषयीभूताभावः खलु अन्योन्याभावो बोध्यः । तर्कसङ्ग्रहकारोऽन्योन्याभावं निरूपयति- "तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः । यथा घटः पटो नेति" (भट्टः, सन् २००४, १८२) इति । तादात्म्यसम्बन्धेन घटे पटो नास्तीत्यत्र यस्याभावः स प्रतियोगीति नियमेन घटे पटाभावश्चेत् पटः प्रतियोगी भवति । स च तादात्म्येनैव । तस्य पदार्थस्यात्मा=स्वरूपमिति तदात्मा, तदात्मनो भावस्तादात्म्यमिति । तन्नामाभेद एव । तथा च पटाभावप्रतियोगी पटः तादात्म्यसम्बन्धावच्छिन्नो भवति । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिता पटे वर्तते, तादृशप्रतियोगिताकाभावो घटे पटो नास्तीत्यभावः । स चान्योन्याभावो बोध्यः । एवञ्च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वे सत्यभावत्वमन्योन्याभावस्य लक्षणं पर्यवस्यति । प्रागभावादावतिव्याप्तिवारणाय तादात्म्यसम्बन्धावच्छिन्नत्वरूपविशेषणपदं देयम् । अन्योन्याभावः स्वाधिकरणे स्वप्रतियोगिसंसर्गविरोधी न भवति । घटे पटस्य, पटे घटस्य वान्योन्याभावो वर्ततेऽपि तादात्म्यं नास्ति । अत एवान्योन्याभावो भेदो वा स्वाधिकरणे स्वप्रतियोगितादात्म्यविरोधी भवति ।

सूत्रकारः कणादस्तु "सच्चासत्" (वैशेषिकसूत्रम्, ९।१।४) इत्यनेन सूत्रेणान्योन्याभावं निरूपयति । सूत्रार्थस्तु सच्च=सदपि वस्तु, असत्=असद् भवतीति व्यवहारदर्शनादन्योन्याभावः सिद्ध्यति । सूत्रोपस्कारे सूत्रार्थं निरूपयति ग्रन्थकारो यथा- "यत्र सदेव घटादि असदिति व्यवह्रियते तत्र तादात्म्याभावः प्रतीयते । भवति हि असन्नश्वो गवात्मना, असन् गौरश्वात्मना, असन् पटो घटात्मना, अघटः पटः, अनश्वो गौः, अगौरश्व इत्यादिप्रतीतिः" (मिश्रः, सन् २०१९, ४७१) अर्थाद् विद्यमानमेव घटादि वस्तु यत्र पटो नास्तीत्यनेन व्यवह्रियते, तत्र घटपटयोस्तादात्म्येन भेदः प्रतीयते । यतोहि अश्वः गवात्मना, गौः अश्वात्मना, पटो घटात्मना, घटः पटात्मना, गौरश्वो न, अश्वः गौर्न इत्यादिप्रतीतौ तादात्म्यसम्बन्धेन प्रतियोगिताको योऽभावः, सोऽन्योन्याभाव इति तात्पर्यम् ।

वस्तुतोऽभावज्ञाने विशेषणीभूते प्रतियोगिनि विशेषरूपेण यो धर्मः प्रतीयते, स प्रतियोगितावच्छेदको धर्मः । यथा घटाभावस्य प्रतियोगी घटः, तस्मिन् घटे यः कम्बुग्रीवादिमत्त्वरूपधर्मः, स प्रतियोगितावच्छेदको भवति । प्रतियोगी येन सम्बन्धेन निषिध्यते, सोऽभावस्य प्रतियोगितावच्छेदकः सम्बन्धो ज्ञेयः । 'घटो न पटः' इत्यत्र घटे यः पटस्याभावः विद्यते, तत्र प्रतियोगी पटो भवति । घटे तन्निषेधो हि कम्बुग्रीवादिमत्त्वरूपासाधारणधर्मेण तादात्म्येन वा भवति । एतेन घटः तादात्म्येन पटो न भवतीति स्पष्टं भवति । एवञ्चान्योन्याभावीयप्रतियोगिता हि तादात्म्यसम्बन्धावच्छिन्नैव भवति । 'घटः पटो न' इत्याकारकप्रतीतौ योऽभावः, स घटानुयोगिकः पटप्रतियोगिकोऽपि ज्ञेयः । एवंरीत्या न्यायवैशेषिकदर्शनयोः अभावविषयकचिन्तनं प्रस्तुतमिति दिक् ।

## निष्कर्षः

पदार्थो हि भावाभावभेदेन द्विविधः । तयोर्मध्ये द्रव्यादिषट्पदार्थभिन्नः, नास्तीतिप्रतीतिविषयकः, नञ्पदजन्यप्रतीतिविषयको वाऽभावो भवति । लोकव्यवहारे घटो न, पटो न, पुस्तकं न इत्याकारकप्रतीतेः विद्यमानत्वादभावोऽपि कश्चन पदार्थः स्वीकर्तव्य एव । द्रव्यं न, गुणो न, कर्म न, सामान्यं न, विशेषो न,

समवायो नेति प्रतीतिसिद्धान्योऽन्याभाववत्त्वमभावत्वमिति न्यायसिद्धान्तमुक्तावलीकारस्य निष्कर्षः । सूत्रकारेण कणादेन पदार्थोद्देशप्रकरणे अभावं विहाय षण्णामेव पदार्थानामुद्देशः कृतोऽप्यग्रे नवमाध्याये 'असतः क्रियागुणव्यपदेशाभावादर्थान्तरम्' इत्यनेन सूत्रेणाभावस्यास्तित्वं साध्यते तेन । तत्र अविद्यमानाद् वस्तुनः क्रियायाः गुणस्य च व्यवहाराभावेन भावपदार्थभिन्नः कश्चनाभावाख्यपदार्थः स्वीकर्तव्य इति कणादनिष्कर्षः । अभावस्य प्रागभावप्रध्वंसाभावभेदेन द्वैविध्यमिति जयन्तभट्टः । संसर्गाभावान्योन्याभावभेदतोऽभावस्य द्वैविध्यम्, संसर्गाभावोऽपि प्रागभावादिभेदेन त्रिविध इति विश्वनाथभट्टाचार्यः । तच्चातुर्विध्यमिति केचन । षाड्विध्यमिति केचन । वस्तुतो नञश्चतुर्धा प्रयोगात्तन्नाम अभावप्रतीतेर्व्यवहारस्य वा चतुर्धावलोकनात् खलु तदर्थभूताभावोऽपि चतुर्विध इति निष्कर्षरूपेण वक्तुं शक्यते । तेषु प्रागभावो नाम इह कपाले घटो भविष्यतीति प्रतीतिसिद्धोऽभावः । स च कार्योत्पत्तिपूर्वं स्वप्रतियोगिसमवायिकारणे प्रतीयमानोऽभावः । तल्लक्षणन्तु प्रागभावाप्रतियोगित्वे सति ध्वंसप्रतियोगित्वमिति । एवमेव कार्योत्पत्त्यनन्तरं स्वप्रतियोगिसमवायिकारणे विद्यमानो योऽभावः, स प्रध्वंसाभावः । घटपटादिनाशे 'घटो नास्ति', 'पटो नास्ति' इति प्रतीतेर्विद्यमानत्वात् प्रध्वंसाभावसिद्धिर्भवति । अत्यन्ताभावस्तु 'इह भूतले घटो नास्ति' इतिप्रतीतिसिद्धाभावः । स च त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताको भवति । अन्योन्याभावो हि तादात्म्येन 'घटः पटो न', 'पटः घटो न' इति प्रतीतिसिद्धाभावः । स च परस्परतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभाव इत्यनुसन्धानात्मकालेखस्य निष्कर्षो विद्यत इति दिक् ।

## कृतज्ञताज्ञापनम्

आलेखेऽस्मिन् न्यायवैशेषिकदर्शनाभिमतस्याभावाख्यपदार्थस्य स्वरूपविश्लेषणक्रमे, सैद्धान्तिकविषयवस्तुनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विद्वज्जनेभ्यो हार्दं धन्यवादं निवेदयन् सूक्ष्मेक्षिकया चालेखमिममाद्यन्तमालोड्य सम्परीक्ष्य च यथावश्यकं परामर्शप्रदातृभ्यो विषयविज्ञेभ्यो हार्दं कार्तज्ञ्यं व्यनज्मि ।

## सन्दर्भसामग्रीसूची

अर्यालः, केशवः (२०७८). *वैशेषिक सूत्रको विवेचनात्मक व्याख्या.* नेपाल-प्रज्ञा-प्रतिष्ठानम् ।

भट्टः, अन्नम् (सन् २००४). *तर्कसंग्रहः.* ''पदकृत्यन्यायबोधिनीसहितः'' (व्याख्याता. केदारनाथत्रिपाठी). मोतीलालबनारसीदासः ।

भट्टः, जयन्तः (सन् २९१७). *न्यायमञ्जरी.* (प्रथमो भागः). सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

भट्टाचार्यः, विश्वनाथपञ्चाननः (सन् २००३). *न्यायसिद्धान्तमुक्तावली.* किरणावलीसमाख्यव्याख्योपेता, व्याख्याता. पं.कृष्णवल्लभाचार्यः (षष्ठसंस्करणम्). चौखम्बासंस्कृतसंस्थानम् ।

मिश्रः, केशवः (सन् २००३). *तर्कभाषा.* आशुबोधिनिहिन्दीव्याख्योपेता, व्याख्याता. सुरेन्द्रदेवशास्त्री (पुनर्मुद्रणम्). चौखम्बाविद्याभवनम् ।

मिश्रः, शंकरः (सन् २०१९). *वैशेषिकसूत्रोपस्कारः*. (व्याख्याता. ढुण्ढिराजशास्त्री). चौखम्भाप्रकाशनम्।
शास्त्री, द्वारिकादासः (सम्पादकः). (सन् १९९८). *षड्दर्शनसूत्रसङ्ग्रहः*. बौद्धभारती।
सिंहः, बद्रीनाथः (सन् ?). *वैशेषिकदर्शन - तुलनात्मक अध्ययन*. आशाप्रकाशनम्।